# 'मृच्छकटिकम्' इति प्रकरणस्य रसविवेचनम्

ज्योति रानी, म0 द0 वि0 (रोहतक)

## कथावस्तु :–

भारतीय नाट्यपरम्परानुसारं ''मृच्छकटिकम्'' इति प्रकरणस्य प्रारम्भमपि नान्दीपाठ माध्यमेन कृतम्। स्रग्धरा छन्दसि विरचितायां प्रथमानन्द्याम् समाधिस्थ शिवस्य निर्विकल्पकसमाधि वर्णिता। अनुष्टुप छन्दसि विरचितायां द्वितीयानान्द्याम् पार्वत्याः भुजलताभ्याम् सुशोभितेन शंकरस्य नीलकण्ठेन सामाजिकानां कल्याणस्य प्रार्थना कृता।

नान्दीपाठस्यानन्तरं प्रस्तावना प्रारभ्यते। प्रस्तावनायाः प्रारम्भे पञ्चश्लोकेषु रचयितुः एवं रचनायाः विषये परिचयं दत्तम्। नाटककारेण निजप्रतिभया सम्पूर्णनाटकस्य कथावस्तुनः संक्षिप्तपरिचयं प्रस्तावनायां एव सूत्रधारेण प्रस्तुतम्।

**अवन्तिपुर्यां द्विजसार्थवाहो युवा दरिद्रः किल चारूदत।**

**गुणानुरक्ता गणिका च वसन्तशोभेव वसन्तसेना।।**

**तयोरिदं सत्सुरतोत्सवाश्रयं नयप्रचारं व्यहारदुष्टताम्।**

**खलस्वभावं भवितव्यतां तथा चकार सर्व किल शुद्रकोनृपः।।** [1]

यत् पुरा उज्जयिन्याम् द्विजवणिक् किन्तु अनन्तरं दरिद्रयुवकः चारूदत्तः वसति स्म। वसन्तऋतोः शोभासमानं वसन्तसेना नाम्ना वेश्या चारूदत्तस्य गुणैः तस्मिन् अनुरक्ता। तयोः श्रेष्ठानन्दोत्सवे आश्रितं, नीतेः आचरणं, विवादस्य दोषपूर्णता, दुष्टानां स्वभावः एवं भवितव्यता एतेषाम् सर्वेषाम् नृपशूद्रेकेन एतस्मिन् मृच्छकटिके नाटके वर्णनं कृतम्।

भारतीय नाट्य समीक्षानुसारं 'रस' रूपकस्य महत्वपूर्णतत्त्वमस्ति। दृश्यकाव्यस्य त्रयः भेदाः सन्ति, तेषु रसोऽपि एको अस्ति। यद्यपि कथासु आख्यायिकासु महाकाव्येषु च सर्वेषु रसास्वादं भवति, किन्तु दृश्यकाव्यस्य प्रमुखलक्ष्यमिदमस्ति यत् सामाजिकानां हृदयेषु रसानुभूतिः स्यात्। संस्कृतसाहित्ये अनेकानि विभिन्नानि गद्यकाव्यानि, पद्यकाव्यानि गीतिकाव्यानि, खण्डकाव्यानि स्त्रोतकाव्यानि च समाहितानि सन्ति। यानि पाठित्वा वयं अद्भुतं आनन्दं अनुभूयामहे, यम् वयं रसस्य नाम्ना जानीमः।

संस्कृतसाहित्ये रसशब्दस्य प्रयोगः अतिप्राचीनकालात् विभिन्नेषु अर्थेषु भवति स्मः रसस्य व्युत्पतिपरकं अर्थमस्ति–आस्वाद्। किन्तु अस्य अन्यं अर्थं द्रव्यं तरलं पदार्थमपि अस्ति। वेदेषु अस्य अनेकाः रूपाः दृश्यन्ते। अस्माकं प्राचीनतमे ग्रन्थे ऋग्वेदे रसस्य प्रयोगः जलदुग्ध सोमायकृते भवति स्म–

**''तं गोभिर्वृषणं रसं मदाय देववीतये। सुतं भराय संसृजा।** [2]

**स्वादस्य पर्यायरूपे– ''स्वादु रसो मधु पयोवराय।''** [3]

तैत्तिरीयोपनिषदि अपि अस्य वर्णनं मिलति, **''यो नो रसं दिप्सति पित्वो अग्ने यो अश्वानां गवां चस्तनूनाम्''** [4]

तैत्तिरीयोपनिषदि परमब्रह्मं रसः कथ्यते यतः तम् अनुभूय जनः परमानन्दस्य अनुभूतिं करोति–**''रसो वै रसः। रसं ह्योवायं लब्ध्वानन्दी भवति। [5]**

कोषग्रन्थानुसारमपि ''रस'' शब्दस्य अनेकाः अर्थाः सन्ति ''स्वाद जल वीर्यश्रृग्ङार इत्यादयः। काव्यरसाः (नव), षड्भोजनरसाः एवं परमात्मा अपि रसः कथ्यते–

**रसे स्वादेजले वीर्ये श्रृंगारादौ विषे द्रवे।**

**पारदे रागे गृहे धातौ तिक्तादौ पारदेऽपि च।। [6]**

नाट्यशास्त्रस्य रचयिता आचार्यभरत मुनिः रसं काव्यगततत्त्वं स्वीकरोति, आस्वाद्य पदार्थं कथयति च रसः इतिकः उच्यते पदार्थ आस्वाद्यत्वात्।[7] अतः रसः किम्? अस्मिन् विषये वयं इदं एव कथयितुम् शक्नुमः यत् विभावानुभावसंचारीभावानां संयोगैः सह्रदयान् यस्य आनन्दस्य अनुभूतिः भवति सः एव रसः। अस्य रसस्य प्रतीतिः एवं अनुभूतिः एवं रूपकानां मुख्यं प्रयोजनं, यतः रसः भेदकतत्त्वं अस्ति अतः विविधरूपकेषु भिन्न–भिन्नरूपकानां प्रधानता गौणता च भवति। प्रस्तुतरूपकः प्रकरणान्तर्गतः आयति। नाट्यशास्त्रानुसारं प्रकरणे श्रृड्गांररसः अड्गीरस भवति। अन्ये रसाः तस्य अड्गीरस रूपे स्थिताः भवन्ति। मृच्छकटिके स्पष्टरूपेण श्रृड्गांररसः अड्गीरसरूपे विद्यते।

श्रृड्गांरस्य अपि द्विविधः भवति– 1. सम्भोग श्रृंगार 2. विप्रलम्भ श्रृंगार। अत्र सम्भोगश्रृंगार मुख्यरसः विद्यते, विप्रलम्भश्रृगांर–करूणा–हास्य–रौद्र–वीर–वीभत्स–भयानकाः रसाः तस्य अड्ंगी रूपेण स्थिताः तेषाम् संक्षिप्त विवेचनं निम्नप्रकारेणास्ति–

**सम्भोगश्रृंगार :–** मृच्छकटिके नायकचारूदत्तस्य नायिकावसन्तसेनायाः च प्रणयस्य चित्रणं कृतम्। वसन्तसेना एका गणिका अस्ति या नाट्यसमीक्षादृष्ट्या सामान्या नायिका अस्ति। यद्यपि सामान्यनायिकायाः प्रेमः रसस्य पराकाष्ठां नैव प्राप्नोति, किन्तु वसन्तसेनायाः प्रेम कुलीननारी इव अत्यन्तं परगाढम् अस्ति अतएव नाटकस्य अन्ते कुलवध्वाः पदं प्राप्तुम् समर्था भवति येन प्रेम रसस्य पराकाष्ठां प्राप्नोति। श्रृंगाररसस्य स्थायीभावः रतिः अस्ति सामान्यरूपेण रत्याः आश्रयः नायकः भवति। किन्तु प्रस्तुतप्रकरणे नायिका वसन्तसेनायाः आश्रयरूपे प्रतीतीः भवति यतः प्रणयस्य अड्ंकुरं प्रथमं तस्यामेव उत्पन्नं भवति, रूपयौवनेन सम्पन्नं चारूदत्तं दृष्ट्वा वसन्तसेनायाः मनसि सर्वप्रथमं अनुरागः जायते। यद्यपि सर्वप्रथमं वसन्तसेनया प्रणयानुरागः प्रकटितः किन्तु चारूदतः अपि तां प्रति उदासीनः नास्ति, तस्य ह्रदये अपि वसन्तसेनां प्रति अनुरागः विद्यते, किन्तु निर्धनतायाः निबिडानुभूत्या सः अतीव दुःखी अस्ति, अतः सः स्वयं इदं वक्तुं संकोचं करोति यत् सः एव वसन्तसेनायाः प्रणयी अस्ति यतः वसन्तसेना एका धनाढ्या गणिका अस्ति। नाटकस्य द्वितीय–तृतीय–चतुर्थांकस्य विप्रलम्भश्रृंगारस्य अभिव्यंजकभावैः अस्य सम्भोगश्रृगांरस्य परिपुष्टिः भवति। पंचमांके अभिसारिकावेशधारिणी वसन्तसेना चारूदत्त समीपे गच्छति अत्र मेघगर्जना एवं दुर्दिनस्य अन्धकारः विद्युतस्य दीप्तिः वसन्तसेनाचारूदत्तयोः प्रणयं उद्दीपनं सहायकाः अभवन्। मेघानां गर्जनां श्रुत्वा चारूदत्तः कथयति–

**मेघा वर्षन्तु गर्जन्तु मुञ्चन्त्वशनिमेव वा।**

**गणयन्ति न शीतोष्ण रमणभिमुखा स्त्रियः। [8]**

एतादृशसमये वसन्तसेना चारूदत्तस्य गृहं गच्छति तत्र वसन्तसेनायाः आलिंगनं कृत्वा चारूदतः निजमृदुभावान् प्रकटयति–

**धन्यानि नैषां खलु जीवितानि, ये कामिनीनां गृहमागतानाम्।**

**आर्द्राणि मेघोदक शीतलानि, गात्राणि गात्रेषु परिष्वजन्ति।[9]**

अत्र वसन्तसेना श्रृंगारं कृत्वा प्रियसमागमार्थं उत्सुका तत्र सप्तमांके चारूदत्तः अपि वसन्तसेनां प्रति उत्सुकः अस्ति, किन्तु दैवयोगात्, वसन्तसेनायाः मोटनं चारूदत्ते अभियोगं मृत्युदण्डं च विप्रलम्भकरूणदशां एव प्रकटयति। तदा पुनर्मिलन भवति, सहसा चारूदत्तः कथयति– 'अहोप्रभावः प्रियसंगमस्य मृतोऽपि को नाम पुनर्धियते।'' नाटकस्य अन्ते पुनः प्रियायाः प्राप्तिः कुलवधूरूपे भवति– ''प्राप्ता भूयः प्रियेयम।''

**विप्रलम्भश्रृगांरः :–** सम्भोगश्रृंगारेण सार्धं विप्रलम्भश्रृंगारस्य वर्णनमपि अस्माभिः यत्–कुत्रचित् दृश्यते। यथा द्वितीयांकस्य प्रारम्भे वयं वसन्तसेनां उद्विगनोत्कण्ठितां पश्यामः। एवमेव चतुर्थांड्कस्य प्रारम्भे वयं तां चारूदत्तस्य चित्ररचनायां संलग्नाः पश्यामः। एवमेव पञ्चमाड्कस्य प्रारम्भे अपि यदा विदूषकः चारूदतं गणिकायाः प्रसंग व्यक्तुं प्रार्थयति तदा तत्र चारूदत्तः प्रकटरूपेण कथयति यस्य समीपे सम्पत्तिः अस्ति तस्य एव सा कामिनी। स्वगतकथने तां प्रति निजोत्सुकता प्रकटयति यत्– ''न इयं जनगुणैः वशीकर्तुम् योग्यः ''अस्मिन् अड्के नायिका वसन्तसेना प्रियसमागमे बाधकमेघैः पीड़िता, सा विद्युतस्य सहानुभूतिः वाञ्छति यतः नारीणाम् दुःख प्रति नारी एव संवेदनशीला भवति। षष्ठसप्तामांके अपि वयं विप्रलम्भश्रृंगारस्य अनेकानि उदहारणानि पश्यामः। एषु अंकेषु विरहस्य उत्कण्ठा उभयपक्षीव्यक्ता, अतएव मृच्छकटिके नाटके सम्भोगश्रृंगारेण सार्धं विप्रलम्भश्रृंगारस्य चित्रणं अपि अतिसुन्दररूपेण कृतम्।

**करूण रसः–** ''मृच्छकटिकं'' इति नाटकस्य सम्बन्धः समाजस्य मध्यमवर्गेण अस्ति अतः अस्मिन करूणरसस्य सुन्दरचित्रणं दृश्यते। नाटकस्य प्रारम्भे प्रथमा चारूदत्तस्य वैभवनाशदारिद्रावस्थायाः च करूणचित्रणं अस्ति। दरिद्रजनस्य शोकजन्यदशां दृष्ट्वा काव्याशास्त्रज्ञाः '' वैभवनाशं'' अपि करूणरसस्य आलम्बनं स्वीकुर्वन्ति। अत्र चारूदत्तः आश्रयः अस्ति, धनवैभवनाशं आलम्बनं, गृहस्यार्थिकदशा मित्रजनानां विमुखीकरणंमित्यादि उद्दीपनं, विषादचिन्तादिसंचारीभावैः करूणरसस्य परिपुष्टिः भवति। यतः धनं बिना मित्रजनाः विमुखाः भवन्ति अतएव चारूदत्तः निजवर्तमानदशां दृष्ट्वा निजभूतं च स्मृत्वा अत्यन्तं दुःखी भवति। तृतीयांकें यदा चौरः वसन्तसेनायाः धरोहरं अपहरति तदा चारूदत्तेन उक्तशोकस्य मार्मिकाभिव्यक्तिः निम्नप्रकारेण भवति–

**कः श्रद्धास्यति भूतार्थ सर्वो मां तूलयिष्यति,**

**शंकनीया हि लोकेऽस्मिन्निष्प्रतापा दरिद्रता।** [10]

नाटके करूणरसस्य चरमोत्कर्षः अस्माभिः दशमांके दृश्यते यदा चारूदत्तस्य मृत्युदण्डस्य घोषणा भवति, तदा वध्यस्थलं प्रति गच्छन् चारूदत्तः निजसंदृशं स्मृत्वा अत्यन्तं दुःखी भवति, सहसा निजपुत्रस्य ध्वनिं श्रुत्वा तं दृष्ट्वा च निजव्यथां प्रकटति–

**चिरं खलु भविष्यामि परलोके पिपासितः**

**अत्यल्पमिदमस्माकं निवापोदकभोजनम्।** [11]

**हास्य रसः –** हास्यव्यंग्यस्य च दृष्ट्या मृच्छकटिकं एकं अद्वितीयं महत्त्वपूर्णं च नाटकं अस्ति। सम्पूर्णसंस्कृतसाहित्ये परिहासस्य योजनायां शूद्रकस्य साम्यं कोऽपि नास्ति। मृच्छकाटिके वर्णितं परिहासं वयं मुख्यतया त्रिषु भागेषु विभक्तुम् शक्नुमः 1. शब्दगतहासः 2. चरित्रगतहासः 3. परिस्थितिगतहासः

1. **शब्दगतहासः** :– अयं हासः मूलतः शब्दानाम् स्थितिः एवं श्लेषादि अलंकारेषु पूर्णरूपेण आश्रितः भवति। शकारस्य कथनेषु शब्दगतभाषागत च हास्यः दृश्यते। प्रथमं सः दन्त्सकारस्य स्थाने सर्वदा तालव्यशकारस्य उच्चारणं करोति एवं पर्यायशब्दानाम् प्रयोगः सः अधिकाधिकरूपेण करोति यथा–

**झणज्झणमिति बहुभूषणशब्द मिश्रं किं द्रौपदीव पलायसे रामभीता?**

**एष हरामि सहसेति यथा हनूमान् विश्वावसोर्भगिनीमेव तां सुभद्राम्।**[13]

2. **चरित्रगतहासः**–मृच्छकटिके मुख्यतया द्वौ हास्यासपदचरित्रौ स्तः–मैत्रेय, शकार च मैत्रैयः पारम्परिकविदूषकः अस्ति किन्तु सः कुत्रचित् परिस्थितिगतवास्तविकतां न पश्यति, निजस्य मुग्धामूर्खतापूर्णोक्तिभिः हास्यं उत्पादयति। यथा पंचमांके सः चेटिम् प्रश्नं पृच्छति–,''चेटि, किं भवत्या इहैव स्वप्तव्यम्। यथा भोजनप्रियता विदूषकस्य गुणः भवति, तथैव मैत्रेयाय अपि भोजनं अतिरोचते। तस्य चेटस्य अपि कथनं अस्ति–

**रमय च राजवल्लभं ततः खादिष्यामि मत्स्यमांसकम्।**

**एताभ्यां मत्स्यमांसाभ्याम् श्वानो मृतकं न सेवते।**[14]

शूद्रकस्य विशेषता अस्मिन् अस्ति यत् तेन पण्डितमानी वजृमूदां अपि हासस्य आलम्बनं कृतम्, यथा सः वसन्तसेनां प्रस्तावं प्रस्तौति,–''अहं वरपुरूषमनुष्यो वासुदेवः कामयितत्यः।'' किन्तु सा कथयति– ''धिक् त्वाम्, शान्तम् शान्तम् अपेहि अनार्य मन्त्रयसि।'' शकारः विपरितकथनैः जनेषु हासं उत्पादयति तस्य वार्ताः एव तादृशाः भवन्ति याः दर्शकान् हसितुम् बाध्यः कुर्वन्ति। यथा सः विटं प्रति कथयति– ''श्रृणोमि माल्यगन्धम्। अन्धकारपूरितया पूनर्नासिकया न सुव्यक्तं पश्यामि भूषणशब्दम्।।''

**परिस्थितिगतहासः**– नाटककारेण परिस्थित्यनुसारं अनेकानि एतादृशानि चित्राणि प्रस्तूयन्ते, यानि दर्शकान् हसितुम् बाध्यः कुर्वन्ति। यथा धूताध्यक्षमाधुरात् त्रातुम् जुआरीसंवाहकः हास्यास्पद–चेष्टाः करोति, सः शनैः शनैः गत्वा समीपस्यमन्दिरे आश्रयति। तत्र तु सः चित्रालिखितः मूर्तिःएव स्थितः भवति। एवमेव पंचमांके यदा वसन्तसेना आगच्छति तदा कुम्भीलकमैत्रेययाः मध्ये प्रश्नोत्तराणि भवन्ति, यस्मिन् मैत्रेयः परिहासस्य पात्रं भवति षष्ठमांके वीरकचन्दनकयोः मध्येविवादं भवति, न्यायालये मैत्रेयशकारयोः प्रसंगानि अपि हास्योत्वादकानि सन्ति अतः हास्य रसस्य सर्वे प्रसंगाः मृच्छकटिके मिलन्ति। संस्कृतासाहित्ये प्रायः हास्यरसस्य उपेक्षाकृतास्ति, तथापि यत्र–कुत्रचित् वयं पश्यामः सोऽपि अत्तीव निम्नश्रेण्याः हास्योस्ति, किन्तु **'मृच्छकटिकम'** इति नाटकस्य हास्यं उच्चश्रेण्याः कथ्यते।

**अन्य रसाः**– उक्तरसैः सार्धं वीभत्सवीरादभुतरसानां कानिचित् उदाहरणानि नाटके दृश्यन्ते। अष्टमांके शकारेण वसन्तसेनायाः ग्रीवाग्रहणेन मूर्च्छेनेन च वीभत्सरसस्य प्रतीतिः भवति। षष्ठमांके आर्यकस्य कारागारात् पालयनं चारूदत्तस्य शकटेः आश्रयग्रहणं, मार्गे तस्य निरीक्षणसमये भयानकरसस्य प्रतीतिः भवति। चतुर्थांके आर्यकसम्बन्धे युद्ववीरस्य, चारूदत्तविषये दानवीरस्य प्रतीतिः भवति। मदमस्तगन्धगजात् सम्बन्धे कर्णपूरकेन भिक्षुकस्य रक्षणे अद्भुतरसस्य प्रतीतिः भवति, इत्यं मृच्छकटिके यद्यपि सर्वेषाम् रसानाम् सुन्दरं समन्वयं अस्ति तथापि श्रृंगार–हास्य–करूणरसाः विशेषरूपेण दृष्ट्व्याः सन्ति।

# सन्दर्भ ग्रन्थ सूची


1. मृच्छकटिकम् अंक प्रथम श्लोक–6
2. ऋग्वेद 9.6.6
3. ऋग्वेद 6.44.21
4. तैतिरीयोपनिषद् 104.10
5. तै0 उ0 2.7.1
6. हेमकोष पृ0 199
7. भर्तृहरि नाट्यशास्त्र– 6.32
8. मृच्छकटिकम् पचमांके श्लोक–16
9. मृच्छकटिकम् पचमांके श्लोक–46
10. मृ0 अंक 10, श्लोक–24
11. मृ0 अंक 10, श्लोक–17
12. मृ0 अंक 1, श्लोक–20
13. मृ0 अंक 1, श्लोक–25
14. मृ0 अंक 5, श्लोक–14